श्री पुंडरीकाक्ष स्तोत्रं

श्री पुंडरीकाक्ष स्तोत्रं

वराह उवाच |
नमस्ते पुंडरीकाक्ष नमस्ते मधुसूदन |
नमस्ते सर्वलोकेश नमस्ते तिग्मचक्रिणे || 1 ||

विश्वमूर्तिं महाबाहुं वरदं सर्वतेजसं |
नमामि पुंडरीकाक्षं विद्याऽविद्यात्मकं विभुं || 2 ||

आदिदेवं महादेवं वेदवेदांगपारगं |
गंभीरं सर्वदेवानां नमस्ये वारिजेक्षणं || 3 ||

सहस्रशीर्षिणं देवं सहस्राक्षं महाभुजं |
जगत्संव्याप्य तिष्ठंतं नमस्ये परमेश्वरं || 4 ||

शरण्यं शरणं देवं विष्णुं जिष्णुं सनातनं |
नीलमेघप्रतीकाशं नमस्ये चक्रपाणिनं || 5 ||

शुद्धं सर्वगतं नित्यं व्योमरूपं सनातनं |
भावाभावविनिर्मुक्तं नमस्ये सर्वगं हरिं || 6 ||

नान्यत्किंचित्प्रपश्यामि व्यतिरिक्तं त्वयाऽच्युत |
त्वन्मयं च प्रपश्यामि सर्वमेतच्चराचरं || 7 ||

इति श्रीवराहपुराणे षष्ठोऽध्याये श्रीपुंडरीकाक्ष स्तोत्रं |